# Shri Bala Mahamalamantra Stava

# શ્રીબાલામહામાલામન્ત્રસ્તવઃ

## Document Information

Text title : Shri Bala Mahamalamantra Stava

File name : bAlAmahAmAlAmantrastavaH.itx

Category : devii, dashamahAvidyA, devI, mAlAmantra, mantra

Location : doc_devii

Proofread by : PSA Easwaran

Description/comments : bAlAsaparyA saparyAkrama-nAmAvalI-stotrAdisaNgrahaH print page 269

Latest update : August 13, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 14, 2023

*sanskritdocuments.org*

# શ્રીબાલામહામાલામન્ત્રસ્તવઃ

અસ્ય શ્રીબાલાત્રિપુરસુન્દરીમહામાલામન્ત્રસ્ય દક્ષિણામૂર્તિઃ ઋષિઃ ।
પઙ્ક્તિશ્છન્દઃ । શ્રીબાલાત્રિપુરસુન્દરી દેવતા ।
ઐં બીજમ્ । સૌઃ શક્તિઃ । ક્લીં કીલકમ્ ।
શ્રીબાલાત્રિપુરસુન્દરીપ્રીત્યર્થે મહામાલામન્ત્રપારાયણે વિનિયોગઃ ।
મૂલવિદ્યાદ્વિરાવૃત્ત્યા કર હૃદયન્યાસઃ -

ધ્યાનમ્-
રક્તામ્બરાં ચન્દ્રકલાવતંસાં સમુદ્યદાદિત્યનિભાં ત્રિનેત્રામ્ ।
વિદ્યાક્ષમાલાભયદાનહસ્તાં ધ્યાયામિ બાલામરુણામ્બુજસ્થામ્ ॥ ૧॥

વિદ્યાક્ષમાલાસુકપાલમુદ્રારાજત્કરાં કુન્દસમાનકાન્તિમ્ ।
મુક્તાફલાલઙ્કૃતશોભિતાઙ્ગીં બાલાં ભજે વાઙ્મયસિદ્ધિહેતોઃ ॥ ૨॥

ભજે કલ્પવૃક્ષાધ ઉદ્દીપ્તરત્નાસને સન્નિષણ્ણાં મદાઘૂર્ણિતાક્ષીમ્ ।
કરૈર્બીજપૂરં કપાલેષુ ચાપં સપાશાઙ્કુશં રક્તવર્ણં દધાનામ્ ॥ ૩॥

વ્યાખ્યાનમુદ્રામૃતકુમ્ભવિદ્યામક્ષસ્રજં સન્દધતી કરાગ્રૈઃ ।
ચિદ્રૂપિણીં શારદ ચન્દ્રકાન્તિં બાલાં ભજે મૌક્તિકભૂષિતાઙ્ગીમ્ ॥

લમિત્યાદિ પઞ્ચપૂજાં કુર્યાત્

વં વં વષટ્ વૌષટ્ શ્રૌષટ્ આં હ્રીં ક્રોં ઐં ક્લીં
સૌઃ આં ઐં હ્રીં ક્લીં સૌઃ ।
આં હ્રીં ક્રોં ઐં ક્લીં સૌઃ શ્રીં હ્સૌઃ નમો ભગવતિ બાલા પરમેશ્વરિ ।
ઐં હ્રીં શ્રીં હ્સૌઃ શૌઃ સહક્ષમલવરય ઈં હસક્ષમલવરય ઊં
શ્રીગુરુ પરમગુરુ પરમેષ્ઠિગુરુ પરાપરગુરુસ્વરૂપે ।
ઐં ક્લીં સૌઃ સકલજગદુત્પત્તિ માતૃકે ।
અકારાદિ ક્ષકારાન્ત માતૃકાવર્ણસ્વરૂપિણિ ।
ઇચ્છા જ્ઞાન ક્રિયા શક્ત્યાત્મિકે ।

ઐં ક્લીં સૌઃ બીજત્રયાત્મિકે । બિન્દુત્રયાત્મિકે । ત્રિકૂટાત્મકે ।
ત્રિગુણાત્મકે । ત્રિખણ્ડાત્મકે । ત્રિચક્રાત્મકે । ત્રિકોણાત્મકે ।
ત્ર્યક્ષરે । ત્રિપુરે । ઐં ક્લીં સૌઃ પઞ્ચભૂતાત્મકે । ત્રિશક્ત્યાત્મકે ।
પઞ્ચકૃત્યપરાયણે । સૃષ્ટિસ્થિતિસંહારતિરોધાનાનુગ્રહકારિકે ।
પઞ્ચપ્રેતમઞ્ચાધિશાયિનિ । ઐં ક્લીં સૌઃ અતલવિતલસુતલ-
તલાતલરસાતલમહાતલપાતાલ-ભૂર્લોકભુવર્લોકસુવર્લોક-
મહોલોકજનોલોકતપોલોકસત્યલોકભુવનૈકવીરમાત્રે ।
સમુદ્યદાદિત્યસહસ્રાભે । સોમસૂર્યાગ્નિલોચનત્રયરાજિતે ।
ચન્દ્રકલાવતંસે । રક્તામ્બરધારિણિ ।
પુસ્તકાક્ષમાલાવરાભયકરવિભૂષિતે ।
કનકવજ્રવૈડૂર્યમુક્તાલઙ્કારભૂષિતે ।
ઐં ઐં સૌઃ ક્લીં ક્લીં ઐં સૌઃ સૌઃ ક્લીં નવાક્ષરાત્મકે ।
નવકોણપુરાવાસે । નવવર્ષવયોવિશિષ્ટાઙ્ગિ । બાલાત્રિપુરે ।
બ્રાહ્મ્યાદ્યષ્ટમાતૃકાપરિસેવિતે । અણિમાદ્યષ્ટૈશ્વર્યપ્રદે । બાલામ્બિકે ।
એહ્યેહિ આગચ્છાગચ્છ । મમ શરીરે પ્રવેશય પ્રવેશય ।
મમ સકલકાર્યાણિ સાધય સાધય । દુર્ગતિં મોચય મોચય ।
શ્રિયં પ્રાપય । પ્રાપય ।
આં ઐં હ્રીં ક્લીં ક્રોં સૌઃ આં હ્રીં ક્રોં ઐં ક્લીં સૌઃ ।
ઐં ઐં નમો બલાવાગીશ્વરિ । ઐં ઐં કર્પૂરધવલાકારપ્રભે ।
ઐં ઐં વ્રજમૌક્તિકમુક્તાલઙ્કારભૂષિતે ।
ઐં ઐં મુક્તાક્ષમાલાપુસ્તકવરાભયકર વિભૂષિતે ।
ઐં ઐં શુભ્રામ્બરધારિણિ ।
ઓં હ્રીં હ્સ્રૈં હ્રીં ઓં ઐં ધીં ક્લીં સૌઃ મહાસરસ્વત્યાત્મકે ।
ઐં ઐં મહાસારસ્વતપ્રદે ।
ઐં ઐં વેદવેદાઙ્ગન્યાયમીમાંસાપુરાણધર્મશાસ્ત્રાત્મકે ।
મમ નિખિલભાષાસુ અનવદ્યગદ્યપદ્યરચનાચાતુર્યં દાપય દાપય ।
વિવિધતર્કવિગાહિતસમસ્તશાસ્ત્રસાગરગરીયઃપ્રતિભાં પ્રાપય પ્રાપય ।
ઐં ઐં વદ વદ વાગ્વાદિનિ । ઐં ઐં ગઙ્ગાતરઙ્ગકલ્લોલવાક્પટુત્વપ્રદે
મમ સકલભાષાસુ મૃદુમધુરરસભાવભાસુરવાગ્જાલં દેહિ દેહિ ।
આં ઐં હ્રીં ક્લીં ક્રોં સૌઃ આં હ્રીં ક્રોં ઐં ક્લીં સૌઃ ।
ક્લીં ક્લીં નમો ભગવતિ બાલા કામેશ્વરિ । ઇચ્છાકામફલપ્રદે ।
ક્લીં ક્લીં રક્તગન્ધાનુલેપને ।

ક્લીં ક્લીં બન્ધૂકકુસુમાકારકાન્તિભૂષણ ભૂષિતે ।
ક્લીં ક્લીં રક્તાલઙ્કારભૂષિતે । ક્લીં ક્લીં રક્તમાલ્યામ્બરધારિણિ ।
ક્લીં ક્લીં ઇક્ષુકોદણ્ડપુષ્પેષુપાશાઙ્કુશકરભૂષિતે ।
ક્લીં ક્લીં સર્વસત્ત્વવશઙ્કરિ । ક્લીં ક્લીં સર્વલોકાકર્ષિણિ ।
ક્લીં ક્લીં સકલકામપ્રપૂરણિ । ક્લીં ક્લીં અસાધ્યસાધિનિ ।
મમ દૃષ્ટાદૃષ્ટાનાં સર્વેષાં સ્ત્રીપુરુષાણાં જનાનાં ગતિમતિ-
હૃદયચિત્તાદિકમાકર્ષયાકર્ષય । વશમાનય વશમાનય ।
સમ્મોહય સમ્મોહય । આં ઐં હ્રીં ક્લીં ક્રોં સૌઃ । આં હ્રીં ક્રોં ઐં ક્લીં સૌઃ ।
સૌઃ સૌઃ નમો બાલા સૌભાગ્યેશ્વરિ । સૌઃ સૌઃ હેમપ્રભાભાસમાને ।
સૌઃ સૌઃ વિદ્યુન્નિકરનમત્પ્રભે । સૌઃ સૌઃ સ્ફુરચન્દ્રકલાપૂર્ણે ।
કલશવરદાભયજ્ઞાનમુદ્રાકરવિભૂષિતે ।
સૌઃ સૌઃ સ્રવત્પીયૂષધારાભિવર્ષિણિ । મહાસૌન્દર્ય સુભગે ।
સૌઃ સૌઃ મહામૃત્યુવિનાશિનિ । સૌઃ સૌઃ સર્વશત્રુસંક્ષોભિણિ ।
મમ શત્રુભિઃ કૃત-ક્રિયમાણ-કરિષ્યમાણ
નિખિલમન્ત્રયન્ત્રતન્ત્રપ્રયોગાન્ ઉચ્ચાટય ઉચ્ચાટય ।
વિવિધ પ્રયોગાન્ નાશય નાશય ।
સૌઃ સૌઃ સર્વશત્રુભયઙ્કરિ ।
મમ શત્રૂણાં વાક્ચિત્તચક્ષુર્જિહ્વાગલચેષ્ટાદિકાન્
સ્તમ્ભય સ્તમ્ભય । આં ઐં હ્રીં ક્લીં ક્રોં સૌઃ આં હ્રીં ક્રોં ઐં ક્લીં સૌઃ
નમો બાલા ત્રિપુરસુન્દરિ । ઐં ક્લીં સૌઃ સર્વોપદ્રવનાશિનિ ।
રાજચોરસર્પસિંહવૃશ્ચિકવ્યાઘ્રાગ્નિજલવિષાદિકોત્પન્નાન્
સર્વોપદ્રવાન્ નાશય નાશય ।
ઐં ક્લીં સૌઃ સર્વવ્યાધિવિનાશિનિ । સર્વરોગાન્નાશય નાશય ।
આરોગ્યં દાપય દાપય । ઐં ક્લીં સૌઃ મહાસામ્રાજ્યદાયિનિ ।
ઐં ક્લીં સૌઃ સર્વસમ્પત્પ્રપૂરણિ । સર્વસૌભાગ્યપ્રદે ।
મહાસમ્પત્પ્રદે મમ સકલૈશ્વર્યં દાપય દાપય ।
ઐં ક્લીં સૌઃ જયે વિજયે જિતે અપરાજિતે સકલલોકજયપ્રદે
મમ સર્વત્ર સર્વદા યશોવિજયાદિકં દેહિ દેહિ ।
સકુટુમ્બં સપરિવારં માં રક્ષ રક્ષ આં ઐં હ્રીં ક્લીં ક્રોં સૌઃ
આં હ્રીં ક્રોં ઐં ક્લીં સૌઃ સકલજગન્નુતાયૈ શ્રીબાલાત્રિપુરસુન્દર્યૈ
હ્રીં હું ફટ્ સ્વાહા ।
અનેન મયા કૃતેન શ્રીબાલાત્રિપુરસુન્દરીમહામાલામન્ત્રજપેન

ભગવતી સર્વાત્મિકા શ્રીબાલાત્રિપુરસુન્દરી સુપ્રીતા સુપ્રસન્ના વરદા ભવતુ !
શ્રીબાલાત્રિપુરસુન્દરીચરણસમર્પિતોઽસ્તુ !

ઇતિ શ્રીબાલામહામાલામન્ત્રસ્તવઃ સમ્પૂર્ણઃ ।

Proofread by PSA Easwaran

---

*Shri Bala Mahamalamantra Stava*
pdf was typeset on August 14, 2023

Please send corrections to *sanskrit@cheerful.com*